श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ वैतालिकपद्धतिः नवमी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वैताळिकपद्धतिः नवमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नमस्ते पादुके! पुंसां संसारार्णवसेतवे।
यदारोहस्य वेदान्ता वन्दिवैतालिकाः स्वयम्॥ ९.१ ॥

उचितमुपचरिष्यन् रङ्गनाथ! प्रभाते
विधिशिवसनकाद्यान् बाह्यकक्ष्यानिरुद्धान्।
चरणकमलसेवासौख्यसाम्राज्यभाजां
प्रथमविहितभागां पादुकाम् आद्रियेथाः॥ ९.२ ॥

पद्माजुष्टं भजतु चरणं पादुका लब्धवारा
प्रत्यासन्नास्तव परिजनाः प्रातरास्थानयोग्याः।
अर्धोन्मेषादधिकसुभगाम् अर्धनिद्रानुषङ्गां
नाभीपद्मे तव नयनयोर्नाथ! पश्यन्तु शोभाम्॥ ९.३ ॥

उपनमति मुहूर्तं शेषसिद्धान्तसिद्धं
तदिह चरणरक्षा रङ्गनाथ त्वयैषा।
मृदुपदमधिरूढा मञ्जुभिः शिञ्जितैः स्वैः
उपदिशतु जनानाम् उत्सवारम्भवार्ताम्॥ ९.४ ॥

रङ्गाधीश! मरुद्गणस्य मकुटादाम्नायबृन्दस्य वा
प्रत्यानीय समर्पिता विधिमुखैर्वारक्रमादागतैः।
वाहारोहणसंभृतं श्रमभरं सम्यग्विनेतुं क्षमा
लीलासञ्चरणप्रिया स्पृशतु ते पादाम्बुजं पादुका॥ ९.५ ॥

वृत्तं क्रमेण बहुधा नियुतं विधीनाम्
अर्धं द्वितीयमिदम् अङ्कुरितं तवाह्नः।

नीलासखीभिरुपनीय निवेश्यमाना
    मङ्क्षु प्रभो ! त्वरयते मणिपादुका त्वाम्॥ ९.६ ॥

दिव्याप्सरोभिरुपदर्शितदीपवर्गे
    रङ्गाधिराज ! सुभगे रजनीमुखेऽस्मिन्।
संरक्षिणी चरणयोः सविलासवृत्तिः
    नीराजनासनमसौ नयतु स्वयं त्वाम्॥ ९.७ ॥

आसनादुचितम् आसनान्तरं
    रङ्गनाथ ! यदि गन्तुमीहसे।
सन्नतेन विधिना समर्पितां
    सप्रसादमधिरोह पादुकाम्॥ ९.८ ॥

परिजनवनिताभिः प्रेषितः प्राञ्जलिस्त्वां
    प्रणमति मदनोऽयं देव ! शुद्धान्तदासः।
फणिपतिशयनीयं प्रापयित्री सलीलं
    पदकमलमियं ते पादुका पर्युपास्ताम्॥ ९.९ ॥

इति निगमवन्दिवचसा समये समये गृहीतसङ्केतः।
अभिसरति रङ्गनाथः प्रतिपदभोगाय पादुके ! भवतीम्॥ ९.१० ॥

॥ इति श्रीपादुकासहस्रे वैतालिकपद्धतिः नवमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥